# Shri Ganesha Stuti Rishabhakrita

# ઋષભકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Rishabhakrita

File name : gaNeshastutiHRRiShabhakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 16 | 2.16 42-55||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# ઋષભકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

ઋષભ ઉવાચ ।

નમસ્તે બ્રહ્મરૂપાય ગણેશ કરુણાનિધે ।

ભેદાભેદાદિહીનાય ગણાનાં પતયે નમઃ ॥ ૪૨॥

નિરાકારાય નિત્યાય જગદાકારમૂર્તયે ।

અનન્તાય પરેશાય પરાત્પરતરાય તે ॥ ૪૩॥

આદિમધ્યાન્તહીનાય ગુણાકારાય તે નમઃ ।

ગુણેશાય જગત્સ્રષ્ટ્રે પાલકાય હરાય ચ ॥ ૪૪॥

નમો નાનાવતારાય ભક્તપાલનહેતવે ।

સુરાસુરમયાયૈવ સુરાસુરસુપૂજિત ॥ ૪૫॥

યોગાય યોગદાત્રે ચ યોગાકારાય તે નમઃ ।

યોગાનાં પતયે તુભ્યં બ્રહ્મણાં પતયે નમઃ ॥ ૪૬॥

સર્વાદયે ગણાધ્યક્ષ સર્વપૂજ્યાય ઢુણ્ઢયે ।

સર્વાન્તે હ્યવશિષ્ટાય વિઘ્નેશાય નમો નમઃ ॥ ૪૭॥

હેરમ્બાય નિજાનન્દવાસિને સિદ્ધસેવિત ।

સિદ્ધિબુદ્ધિપતે તુભ્યં નાના ખેલકરાય તે ॥ ૪૮॥

ધર્માર્થકામમોક્ષાણાં દાયકાય નમો નમઃ ।

બ્રહ્મીભૂતકરાયૈવ બ્રહ્મભૂતમયાય ચ ॥ ૪૯॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગશાન્તિમયં પ્રભો ।

યં સ્તોતું ન સમર્થાશ્ચ વેદાદ્યાઃ શિવમુખ્યકાઃ ॥ ૫૦॥

તથાપિ ચ યથાબુદ્ધિજ્ઞાનં ત્વં સંસ્તુતો મયા ।

ભક્તિં દેહિ ત્વદીયાં મે દૃઢામવ્યભિચારિણીમ્ ॥ ૫૧॥

મુદ્ગલ ઉવાચ ।

ઇત્યુક્ત્વા નિપપાતોર્વ્યાં પદં ધૃત્વા મહાયશાઃ ।

ગણેશસ્ય ચ તેનાપિ સમુત્થાપિત આદરાત્ ॥ ૫૨॥

જગાદ ગણનાથઃ સ ઋષભં ભક્તમુત્તમમ્ ।
શિવશિષ્યં શિવપ્રજ્ઞં સાક્ષાદ્વિષ્ણું સનાતનમ્ ॥ ૫૩॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
મદીયા ભક્તિરત્યન્તં ભવિષ્યત્યચલાનઘ ।
સ્તોત્રં ત્વયા કૃતં મે તુ શાન્તિદં પ્રભવિષ્યતિ ॥ ૫૪॥
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
શ્રવણાન્નાત્ર સન્દેહો ભાવપૂર્ણં મતં મમ ॥ ૫૫॥

ઇતિ ઋષભકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૧૬ । ૨.૧૬ ૪૨-૫૫॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 16 . 2.16 42-55..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Rishabhakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*